दत्तात्रेयस्तोत्रप्रारंभः ॥

गोपीनाथशर्मा



श्रीगणेशाय नमः ॥ श्रीगुरवे नमः ॥ ध्यानम् ॥
जटाधरं पांडुरंगं शूलहस्तं कृपानिधिम् ॥ सर्व-
रोगहरं देवं दत्तात्रेयमहं भजे ॥ १ ॥ अस्य
श्रीदत्तात्रेयस्तोत्रमंत्रस्य ॥ भगवान्नारद ऋषिः ॥
अनुष्टुप् छंदः ॥ श्रीदत्तः परमात्मा देवता ॥
श्रीदत्तप्रीत्यर्थे जपे विनियोगः ॥ जगदुत्पत्तिकर्त्रे
च स्थितिसंहारहेतवे ॥ भवपाशविमुक्ताय दत्ता-
त्रेय नमोऽस्तु ते ॥ १ ॥ जराजन्मविनाशाय

देहशुद्धिकराय च ॥ दिगंबर दयामूर्ते दत्तात्रेय
नमोऽस्तु ते ॥ २ ॥ कर्पूरकांतिदेहाय ब्रह्ममूर्ति-
धराय च ॥ वेदशास्त्रपरिज्ञाय दत्तात्रेयन०
॥ ३ ॥ ह्रस्वदीर्घकृशस्थूलनामगोत्रविवर्जित ॥
पंचभूतैकदीप्ताय दत्तात्रेय न० ॥ ४ ॥ यज्ञ-
भोक्त्रे च यज्ञाय यज्ञरूपधराय च ॥ यज्ञप्रि-
याय सिद्धाय दत्तात्रेय नमो० ॥ ५ ॥ आदौ
ब्रह्मा मध्ये विष्णुरंते देवः सदाशिवः ॥ मूर्ति-

त्रयस्वरूपाय दत्तात्रेय न० ॥ ६ ॥ भोगालयाय
भोगाय योग्ययोग्याय धारिणे॥ जितेंद्रिय जित-
ज्ञाय दत्तात्रेय नमो० ॥ ७ ॥ दिगंबराय दिव्याय
दिव्यरूपधराय च ॥ सदोदितपरब्रह्म दत्तात्रेय
न० ॥८॥ जंबुद्वीपे महाक्षेत्रे मातापुरनिवासिने ॥
जयमान सतां देव दत्तात्रेय नमो० ॥९॥ भिक्षा-
टनं गृहे ग्रामे पात्रं हेममयं करे ॥ नानास्वाद-
मयी भिक्षा दत्तात्रेय नमो० ॥ १० ॥ ब्रह्मज्ञा-

नमयी मुद्रा वस्त्रमाकाशभूतले ॥ प्रज्ञानघनबो-
धाय दत्तात्रेय नमो० ॥ ११ ॥ अवधूत सदानंद
परब्रह्मस्वरूपिणे ॥ विदेहदेहरूपाय दत्तात्रेय०
॥ १२ ॥ सत्यरूप सदाचार सत्यधर्मपरायण ॥
सत्याश्रय परोक्षाय दत्तात्रेय नमो० ॥ १३ ॥
शूलहस्त गदापाणे वनमालासुकंधर ॥ यज्ञसू-
त्रधर ब्रह्म दत्तात्रेय नमोऽस्तु ते ॥ १४ ॥ क्षरा-
क्षरस्वरूपाय परात्परतराय च ॥ दत्त मुक्तिपर-

स्तोत्र दत्तात्रेय नमोऽस्तु ते ॥ १५ ॥ दत्तवि-
द्याय लक्ष्मीश दत्तस्वात्मस्वरूपिणे ॥ गुणनिर्गु-
णरूपाय दत्तात्रेय नमोऽस्तु ते ॥ १६ ॥ शत्रु-
नाशकरं स्तोत्रं ज्ञानविज्ञानदायकम् ॥ सर्वपापं
शमं याति दत्तात्रेय० ॥१७॥ इदं स्तोत्रं महद्दिव्यं
दत्तप्रत्यक्षकारकम् ॥ दत्तात्रेयप्रसादाच्च नारदेन
प्रकीर्तितम् ॥ १८ ॥ इति दत्तात्रेयस्तोत्रं सं०

इदं मुंबय्यां 'निर्णयसागर' प्रेस-प्रभ्वर्थे कोलभाट नं. २३ गृहे
रा. रा. [illegible] इत्यनेन मुद्रितं । शके [illegible]

दत्तात्रेयस्तोत्रं समाप्तम् ॥